**C** SL. No. : Q

**CCE PR REVISED**

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 57 ]
Total No. of Questions : 57 ]

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 67-S** **Code No. : 67-S**

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : Third Language — SANSKRIT
# तृतीय भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**( ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Repeater )**

ದಿನಾಂಕ : 28. 06. 2018 ] [ Date : 28. 06. 2018

ಸಮಯ : ಬೆಳಿಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-15 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-15 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

### *ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 57 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### *छात्रं प्रति सामान्यनियमाः*

1. अस्मिन् प्रश्नपत्रे सप्तपञ्चाशत् (57) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तय । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति पर्यालोचय ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकतयाः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारिता समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । यस्मिन् पञ्चदशपलानि प्रश्नपत्रस्य पठनार्थं निर्धारितानि सन्ति ।



इतः कर्तय

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमितः कर्तय

Tear here

## भागः - A

### ( गद्यम्-पद्यम्-पूरकपाठाः )

I. एकवाक्येन उत्तरं लिखत — 14 × 1 = 14

1. पठनार्थं का आवश्यकी ?
2. केषां मध्ये भीषणं युद्धं प्रचलति स्म ?
3. वामनः किमर्थं विरामम् इच्छति ?
4. मेलुकोटे कस्मिन् मण्डले अस्ति ?
5. स्वामी विवेकानन्दः कुत्र गतवान् ?
6. कः महाभारतं रचितवान् ?
7. कः इन्दुःक्षीरनिधाविव प्रसूतः ?
8. लोकपाली कः ?
9. कालपर्ययात् का क्षयं गच्छति ?
10. पूज्यशैलः कः ?
11. वैरमुडि इति उत्सवः कदा आचर्यते ?
12. ढुण्ढिराजः कः ?
13. दिलीपः भूमिं काम् इव शशास ?
14. पूज्यनदी का ?

II. रिक्तस्थानानि पूरयत — 3 × 1 = 3

15. तद्धितप्रत्ययान्तं पदं ...................................... ।
16. छन्दः शास्त्रस्य कर्ता ...................................... ।
17. नानार्थ संश्रयः ................................ अलङ्कारः ।

III. संयोज्य लिखत – 4 × 1 = 4

| अ | आ |
|---|---|
| 18. जानकी | a) सम्प्रदायः |
| 19. अङ्गराजः | b) सदयम् |
| 20. हृदयम् | c) सीता |
| 21. परम्परा | d) कर्णः |
| | e) घोषणम् |
| | f) रावणः । |

IV. **द्वित्रैः** वाक्यैः संस्कृतभाषया उत्तरं लिखत – 3 × 2 = 6

22. कर्मणः विषये भगवतः अभिप्रायः कः ?

23. कालान्तरे कानि-कानि विनश्यन्ति ?

**अथवा**

पञ्च अचोरहरणीयानि कानि ?

24. गणेशः कीदृशः ?

V. श्लोकतात्पर्यं कन्नडभाषया आङ्ग्लभाषया वा लिखत – 2 × 2 = 4

25. भारतवासिषु बाह्ये भेदे
बहुत्र बहुधा दृष्टेऽपि ।
आन्तरङ्गिकी संस्कृतिरेका
सनातनी नो बध्नाति ।।

26. व्यूढोरस्को वृषस्कन्धः शालप्राशुर्महाभुजः ।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ।।

**अथवा**

चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।।

VI. संस्कृतभाषया अनुवादं कुरुत – 2

27. ಆನೆಯು ಸಸ್ಯಾಹಾರಿ ಪ್ರಾಣಿ. ಅದು ಕಾಡಿನಲ್ಲಿ ವಾಸಿಸುತ್ತದೆ.

कर्नाटकभाषया अनुवादं कुरुत – 2

28. कृषकाः ग्रामे निवसन्ति । ते क्षेत्रेषु श्रमेण कार्यं कुर्वन्ति ।

VII. कवेः देश-काल-ग्रन्थानां विषये लिखत – 3

29. कालिदासः

**अथवा**

भोजराजः ।

VIII. यथानिर्देशम् उत्तरं लिखत – 3 × 3 = 9

30. ''भवान् कर्णाय साधुवादं यच्छति ।''

कः पाठः ? कः अवदत् ? कम् अवदत् ?

31. ''जित्वा पृथवीं ददामि ।''

कः पाठः ? कः अवदत् ? कम् अवदत् ?

32. ''मया एतानि सर्वाणि पुस्तकानि पठितानि ।''

कः पाठः ? कः अवदत् ? कम् अवदत् ?

IX. कर्णाटकभाषया, आङ्गलभाषया, संस्कृतभाषया वा उत्तरं लिखत – 4 × 3 = 12

33. दिलीपस्य शासनपद्धतिं विवृणत ।

34. मेलुकोटे क्षेत्रम् अधिकृत्य लिखत ।

35. उभयभारती भारतस्य आदर्शनारी इति विषयं विवृणत ।

**अथवा**

''विक्रमः वेतालश्च'' इति पाठस्य सारांशं सङ्गृह्य लिखत ।

36. इन्द्रकर्णयोः सम्भाषणं सङ्गृह्य लिखत ।

X. श्लोकद्वयं पूरयत – 2 × 4 = 8

37. गुरवे सर्वविद्यानां सर्व ..............................................................................

.............................................................................. मूर्तये नमः ॥

38. शीलं शौर्यम् ..............................................................................

.............................................................................. निधिः ॥

## भागः - B

### ( व्याकरणविभागः )

XI. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत । 12 × 1 = 12

39. 'जनकः' अस्य पर्यायपदम् इदं भवति –

(A) जानकी (B) पिता

(C) जननी (D) जनता ।

40. 'नूतनम्' अस्य विरुद्धार्थकपदम् इदं भवति –

(A) पुरातनम् (B) नवीनम्

(C) सदातनम् (D) अधुनातनम् ।

41. 'ग्रन्थालयः' अत्र एषा विभक्तिः अस्ति –

(A) पञ्चमी (B) तृतीया

(C) प्रथमा (D) चतुर्थी ।

42. अत्र समूहेतर पदम् इदं भवति –

(A) विवेकानन्दः (B) अखण्डानन्दः

(C) ग्रन्थालयः (D) व्यापारी ।

43. 'वेदाद्रिः' अत्र अयं सन्धिः भवति –

(A) गुणः (B) यण्

(C) सवर्णदीर्घः (D) यान्तवान्तादेशः ।

44. 'पुष्पम्' अस्य बहुवचनरूपम् इदम् अस्ति –

(A) पुष्पाय (B) पुष्पे

(C) पुष्पात् (D) पुष्पाणि ।

45. 'अन्यपदार्थप्रधानः' अयं समासः भवति –

(A) तत्पुरुषः (B) बहुव्रीहिः

(C) अव्ययीभावः (D) द्वन्द्वः ।

46. 'गजस्तत्र' अत्र एषः आदेशः भवति –

(A) सकारादेशः (B) रकारादेशः

(C) लोपः (D) उकारादेशः ।

47. 'बालकम्' एतत् पदम् अस्मिन् कारके भवति –

(A) कर्तृकारके (B) करणकारके

(C) कर्मकारके (D) अपादानकारके ।

48. अत्र अम् अव्ययीभाव समासस्य उदाहरणम् –

(A) प्रतिदिनम् (B) महाबलः

(C) रामपुस्तकम् (D) रामकृष्णौ ।

49. 'मुनिस्सः' अत्र सन्धिविभागः एवं भवति –

(A) मुनीः + सः (B) मुनिः + सः

(C) मुनेः + सः (D) मुनौ + सः ।

50. 'पुत्राय' अत्र एतत् कारकमस्ति –

(A) कर्तृकारकम् (B) कर्मकारकम्

(C) करणकारकम् (D) सम्प्रदानकारकम् ।

XII. चतुर्थपदं लिखत – $2 \times 1 = 2$

51. i) रूपम् अस्य अस्तीति – रूपवान् :: गुणः अस्य अस्तीति – ......................... ।

ii) भवताम् अयम् – भवदीयः :: आदौ भवः – .............................. ।

कृदन्तपदं चित्वा लिखत – $2 \times 1 = 2$

52. i) देवी विराजमाना अस्ति ।

ii) छात्रः क्रीडितुम् इच्छति ।

## भागः - C

### ( रचनाविभागः )

XIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत – 2

53. सोमदत्तः अभिमन्युः इव शूरः ।

XIV. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत – 2

54. सप्राण एव वसतीति विचित्रमेतत् ।

XV. पत्रं लिखत – 4

55. दिनद्वयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति पत्रं लिखत ।

**अथवा**

अध्ययन विषये पितरं प्रति पत्रं लिखत ।

XVI. प्रबन्धं लिखत – 5

56. सङ्गणकयन्त्रम् ।

**अथवा**

परिसरसंरक्षणम् ।

XVII. गद्यभागं पठित्वा अधोलिखित प्रश्नानाम् उत्तरं लिखत – 4 × 1 = 4

57. कस्मिंश्चित् ग्रामे एकः काकः आसीत् । सः एकदा तृषार्तः जलम् अन्वेष्टुं गतः । एकत्र लघुभाण्डे सः जलं दृष्टवान् । परं जलम् अधोभागे आसीत् । काकः स्वचञ्च्वा जलं पातुम् अशक्तः अभवत् । परं बुद्धिमान् सः पार्श्वस्थान् शिलाखण्डान् एकैकशः गृहीत्वा भाण्डे स्थापितवान् । शिलाखण्डपूरणेन जलम् उपरि आगतम् । काकः सन्तोषेण जलं पीतवान् ।

i) तृषार्तः काकः किम् अन्वेष्टुं गतः ?

ii) काकः कुत्र जलं दृष्टवान् ?

iii) काकः कान् जलभाण्डे स्थापितवान् ?

iv) कथं जलम् उपरि आगतम् ?